श्रीमते रामानुजाय नमः

# ॥ श्री वेङ्कटेश स्तोत्रम् ॥

* कमलाकुच चूचुक कुङ्कुमतो नियतारुणितातुल नीलतनो।
कमलायत लोचन लोकपते विजयीभव वेङ्कटशैलपते॥ १

सचतुर्मुख षण्मुख पञ्चमुख प्रमुखाखिल दैवत मौलिमणे।
शरणागत वत्सल सारनिधे परिपालय मां वृषशैलपते॥ २

अतिवेलतया तव दुर्विषहैः अनुवेलकृतैरपराधशतैः।
भरितं त्वरितं वृषशैलपते परया कृपया परिपाहि हरे॥ ३

अधिवेङ्कटशैलमुदारमतेः जनताभिमताधिकदानरतात्।
परदेवतया गतितान् निगमैः कमलादयितान् न परं कलये॥ ४

कलवेणुरवावशगोपवधू शतकोटिवृतात् स्मरकोटिसमात्।
प्रतिवल्लविकाभिमतात् सुखदात् वसुदेव सुतान् न परं कलये॥ ५

अभिराम गुणाकर दाशरते जगदेक धनुर्धर धीरमते।
रघुनायक राम रमेश विभो वरदो भव देव दयाजलधे॥ ६

अवनीतनया कमनीयकरं रजनीकर चारुमुखाम्बुरुहम्।
रजनीचर राज तमोमिहिरं महनीयमहं रघुराम मये॥ ७

सुमुखं सुहृदं सुलभं सुखदं स्वनुजं च सुकायममोघचरम्।
अपहाय रघूद्वह मन्यमहम् न कथञ्चन कञ्चन जातु भजे॥ ८

* विना वेङ्कटेशं न नाथो न नाथः सदा वेङ्कटेशं स्मरामि स्मरामि।
हरे वेङ्कटेश प्रसीद प्रसीद प्रियं वेङ्कटेश प्रयच्छ प्रयच्छ॥ ९

अहं दूरतस्ते पदाम्भोजयुग्म प्रणामेच्छयाऽऽगत्य सेवां करोमि।
सकृत्सेवया नित्य देवाफलं त्वं प्रयच्छ प्रयच्छ प्रभो वेङ्कटेश॥ १०

* अज्ञानिना मया दोषान् अशेषान् विहितान् हरे।
क्षमस्व त्वं क्षमस्व त्वं शेषशैल शिखामणे॥ ११

**॥ इति श्री वेङ्कटेश स्तोत्रं संपूर्णम्॥**